॥ वायुगद्यम् ॥

भारतीरमणं वायुं कारणं सर्वसम्पदाम् ।

तारकं भवपाथोधेर्नारायणपरं नुमः ॥

ॐ श्रीमते धर्मज्ञानवैराग्यैश्वर्यादिगुणवते । शिवशेषख-
गेशमुखामरस माराधितचरणसरोरुहाय । रिपुदुःसहाय । पञ्चबा-
णतूणीरनिभजङ्घाय । पराकृतपरमोत्साहवर्जितातिरिक्तदोषसङ्घाय ।
हस्तिहस्तप्रशस्तोरुद्वयाय । भगवत्प्रीत्यर्थाज्ञानशोकभयाय ।
स्वच्छकौशेयपटकटिसूत्राभिरामकटितटाय । स्वाभाविकाणिमादिकूटाय ।
जाह्नवीवर्तुलावर्तसन्निभङ्गभीरनाभिबिलाय । विविधवीरकार्तस्वरनि-
कषपाषाणायितवक्षःस्थलाय । हरिवैरिशरीरविदारणगदावरायुधध-
रभुजाय । मन्दस्मितचन्द्रिकाकान्तवदनद्विजराजाय । रमारमणचरणा-
रुणसरोजभृङ्गाय । जृम्भमाणोत्तमाङ्गाय । सम्पूर्णलक्षणचार्वङ्गाय ।
ऋजुपुङ्गवाय । ईशादन्यत्र सर्वत्रालोचने सर्वविषयेण ईशे त्वसार्व-
त्रिकेन अनादिनित्येन आमुक्ति क्रमेण वर्धमानेन ततोऽव्ययेन सदापूर्णेन
वेदोक्ताधिकविषयेण वेदसंवादिना महाज्ञानेन शतजन्मपूर्वमुदितापरो-
क्षज्ञानेन प्रतिभातिशयेन च युक्ताय । सदा वासुदेवप्रसादकस्ववश-
मानसाय । भविष्यच्चतुर्मुखाय । सत्त्वसत्त्वमहासत्त्वसूक्ष्मसत्त्वाय ।
सत्त्वप्रचुरात्यल्परजस्तमस्काय । समस्तब्रह्माण्डविततविग्रहाय ।
आखणाश्मसमत्वेनासुरावेशविधुराय । सुप्त्यादौ जीवं स्वान्तर्निवेश्य
भगवत्प्रविष्टाय । अत्यल्पदुःखस्पृष्टत्वेऽप्यात्मसम्बन्धितया
भोगाभावादनभिमानाच्चासम्पीडिताय । स्वस्वगुणज्ञानिषु बहुरूपेण
प्रविष्टाय । सुपर्णाद्यधिकतत्त्वज्ञानाय । तदभिमानवर्जितगुणपूर्णाय ।
नित्यं सञ्चारशीलाय । अचलतयैव चलदिन्द्रियप्रवर्तकाय । प्रतिदेहं
बाह्यान्तर्नेतृत्वेन व्यष्टिसमष्टिशब्दवाच्याय । अनभिमानादशरीराय ।
पार्थिवभागाभावेनाकाल्यत्वेन चाप्तेजोवायुरूपभूतत्रयकृतशरीराय ।

अतिरोहितविज्ञानत्वेनान्नादिना वृद्धिह्रासरहितत्वेन चामृताय । प्रळय-
कालेऽपि प्रतिभातपरावराय । सर्वथा संशयविधुराय । भगवति
सर्वचेष्टासमर्पकाय । सर्वसारभोगसक्ताय । भोग्यभोक्तृरूपाय ।
हरिरमाप्रसिद्धशब्दातिरिक्तानन्तवेदवेद्याय । प्रणवप्रतिपाद्याय । अनन्त-
रूपाय । विशेषतस्त्रिकोटिरूपाय । अवतारत्रयोपेताय । तत्र हनुमदा-
ख्येनावतारेण श्रीरामचन्द्रकार्यसाधकाय । द्वितीयेन भीमाख्येन माग-
धवधादिश्रीकृष्णकार्यसाधकाय । तृतीयेन मध्वाख्येनावतारेण
एकविंशतिकुभाषयदूषणपरिहारोपदेशादिव्यासकार्यसाधकाय ।
अवतारेषु कदाचिद्भगवद्रूपविशेषापरोक्षज्ञानोज्झिताय । साक्षात्-
सर्वाङ्गसायुज्ययोग्याय । अच्छिन्नविष्णुधर्माय । काम्यकर्मरहिताय ।
एकान्तभक्ताय । सर्वेषां ज्ञानोपदेशकाय । हर्याज्ञया मुक्तिप्रदाय ।
सकलजीवोत्तमाय रमापतिप्रियतमाय । ॐ श्रीभारतीरमणाय श्रीवायुदेवाय
नमो नमः ॥

हृद्यगद्यस्तुतो दद्याद्विद्यां सद्योऽनवद्यकाम् ।

विनिर्भिद्य दृढाविद्यामच्छेद्यां शारदापतिः ॥

इति श्रीव्यासतीर्थकृत वायुगद्यम् ।

॥ भारतीरमणमुख्यप्राणान्तर्गत श्री कृष्णार्पणमस्तु॥